শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৯৫

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥ শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৯৫

*কৈৱল্যসিদ্ধিপ্ৰকারৱৰ্ণনম্*

আদৌ হৈরণ্যগর্ভীং তনুমৱিকলজীৱাত্মিকামাস্থিতস্ত্ৱং
জীৱত্ৱং প্ৰাপ্য মাযাগুণগণখচিতো ৱৰ্তসে ৱিশ্ৱযোনে।
তত্ৰোদৱৃদ্ধেন সত্ত্ৱেন তু গুণযুগলং ভক্তিভাৱং গতেন
ছিত্ত্ৱা সত্ত্ৱং চ হিত্ৱা পুনরনুপহিতো ৱৰ্তিতাহে ত্ৱমেৱ॥ ১ ॥

সত্ত্ৱোন্মেষাত্ কদাচিত্ খলু ৱিষযরসে দোষবোধেপি ভূমন
ভূযোপ্যেষু প্ৰৱৃত্তিসসতমসি রজসি প্ৰোদ্ধতে দুৰ্নিৱারা।
চিত্তং তাৱদগুণাশ্চ গ্ৰথিতমিহ মিথস্তানি সৰ্ৱাণি রোদ্ধুং
তুৰ্যে ত্ৱয্যেকভক্তিশ্শরণমিতি ভৱান্ হংসরূপী ন্যগাদীত্॥ ২ ॥

সন্তি শ্ৰেযাংসি ভূযাংস্যপি রুচিভিদযা কৰ্মিণাং নিৰ্মিতানি
ক্ষুদ্ৰানন্দাশ্চ সান্তা বহুৱিধগতযঃ কৃষ্ণ তেভ্যো ভৱেযুঃ।
ত্ৱং চাচখ্যাথ সখ্যে ননু মহিততমাং শ্ৰেযসাং ভক্তিমেকাং
ত্ৱদ্ভক্ত্যানন্দতুল্যঃ খলু ৱিষযজুষাং সম্মদঃ কেন ৱা স্যাত্॥ ৩ ॥

ত্ৱদ্ভক্ত্যা তুষ্টবুদ্ধেঃ সুখমিহ চরতো ৱিচ্যুতাশস্য চাশাঃ
সৰ্ৱাঃ স্যুঃ সৌখ্যমযঃ সলিলকুহরগস্যেৱ তোযৈকমযঃ।
সোযং খল্ৱিন্দ্ৰলোকং কমলজভৱনং যোগসিদ্ধীশ্চ হৃদ্যাঃ
নাকাঙ্ক্ষত্যেতদাস্তাং স্ৱযমনুপতিতে মোক্ষসৌখ্যেপ্যনীহঃ॥ ৪ ॥

ত্ৱদ্ভক্তো বাধ্যমানোপি চ ৱিষযরসৈরিন্দ্ৰিযাশান্তিহেতো-
ৰ্ভক্ত্যৈৱাক্ৰম্যমাণৈঃ পুনরপি খলু দুৰ্বলৈৰ্নাভিজয্যঃ।
সপ্তাৰ্চিৰ্দীপিতাৰ্চিৰ্দহতি কিল যথা ভূরিদারুপ্ৰপঞ্চং
ত্ৱদ্ভক্ত্যোঘে তথৈৱ প্ৰদহতি দুরিতং দুৰ্মদঃ ক্ৱেন্দ্ৰিযাণাম্॥ ৫ ॥

www.prapatti.com

চিত্তার্দ্রীভাৱমুচ্চৈর্ৱপুষি চ পুলকং হর্ষবাষ্পং চ হিত্বা
চিত্তং শুদধ্যেতকথং ৱা কিমু বহুতপসা ৱিদ্যযা ৱীতভক্তেঃ।
ত্বদ্গাথাস্বাদসিদ্ধাঞ্জনসততমরীমৃজ্যমানোযমাত্মা
চক্ষুর্ৱত্ তত্ত্বসূক্ষ্মং ভজতি ন তু তথাভ্যস্তযা তর্ককোট্যা॥ ৬ ॥

ধ্যানং তে শীলযেযং সমতনুসুখবদ্ধাসনো নাসিকাগ্র-
ন্যস্তাক্ষঃ পূরকাদ্যৈর্জিতপৱনপথশ্চিত্তপদ্মং ত্বৱাঞ্চম্।
ঊর্ধ্বাগ্রং ভাৱযিত্বা রৱিৱিধুশিখিনঃ সংৱিচিন্ত্যোপরিষ্টাত
তত্রস্থং ভাৱযে ত্বাং সজলজলধরশ্যামলং কোমলাঙ্গম্॥ ৭ ॥

আনীলশ্লক্ষ্ণকেশং জ্বলিতমকরসতকুণ্ডলং মন্দহাস-
স্যন্দার্দ্রং কৌস্তুভশ্রীপরিগতৱনমালোরুহারাভিরামম্।
শ্রীৱতসাঙ্কং সুবাহুং মৃদুলসদুদরং কাঞ্চনচ্ছাযচেলং
চারুস্নিগ্ধোরুমম্ভোরুহললিতপদং ভাৱযেহং ভৱন্তম্॥ ৮ ॥

সর্ৱাঙ্গেষ্ৱঙ্গ রঙ্গতকুতুকমতি মুহুর্ধারযন্নীশ চিত্তং
তত্রাপ্যেকত্র যুঞ্জে ৱদনসরসিজে সুন্দরে মন্দহাসে।
তত্রালীনং তু চেতঃ পরমসুখচিদদ্বৈতরূপে ৱিতন্ৱ-
ন্নন্যন্নো চিন্তযেযং মুহুরিতি সমুপারূঢযোগো ভৱেযম্॥ ৯ ॥

ইত্থং ত্বদধ্যানযোগে সতি পুনরণিমাদ্যষ্টসংসিদ্ধযস্তাঃ
দূরশ্রুত্যাদযোপি হ্যহমহমিকযা সম্পতেযুর্মুরারে।
ত্বতসম্প্রাপ্তৌ ৱিলম্বাৱহমখিলমিদং নাদ্রিযে কামযেহং
ত্বামেৱানন্দপূর্ণং পৱনপুরপতে পাহি মাং সর্ৱতাপাত্॥ ১০ ॥

**********